## संयुक्त–संस्कृतम् (द्वितीय/तृतीय भाषा) 'आनन्दः।' इयत्ता – दहावी
## इयत्ता दहावीच्या प्रस्तावित आराखड्यानुसार कृतिपत्रिका क्र – १

**समयः – होराद्वयम् ।** **गुणाङ्काः – ५०**

### प्रथमः विभागः – सुगमसंस्कृतम् (१०)

**(१) अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४)** ४

१) 
२) 
३) 
४) 

५) 

**आ) सङ्ख्याः अक्षरैः / अङ्कैः लिखत । (३ तः २)** २

१) २५  २) त्र्यशीतिः  ३) ९१

**इ) समय–स्तम्भमेलनं कुरुत।** २

| अ | आ |
|---|---|
| १) पञ्चोन–सप्तवादनम् | १) ३.२५ |
| २) सपाद–एकादशवादनम् | २) ६.५५ |
| ३) पञ्चविंशत्यधिक–त्रिवादनम् | ३) ८.३० |
| ४) सार्ध–अष्टवादनम् | ४) ११.१५ |

**ई) वासर–तालिकां पूरयत । (३ तः २)** २

| ............ मङ्गलवासरः | ← | ह्यः .......... | ← | अद्य गुरुवासरः | → | ....... शुक्रवासरः |
|---|---|---|---|---|---|---|

### द्वितीयः विभागः – गद्यम् । (१६)

**२) अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।** ५

प्रदोषकाले मृगमन्विष्यन् काकस्तत्रोपस्थितः । मृगं तथाविधं दृष्ट्वा स उवाच, "सखे ! किमेतत् ?" मृगेणोक्तम्, "सुहृद्वाक्यस्य अनादरात् बद्धोऽहम् । उक्तं च –

सुहृदां हितकामानां यः शृणोति न भाषितम् ।
विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः ।।"

काकः अब्रूत, "स वञ्चकः क्वास्ते ?" मृगेणोक्तम्, "मन्मांसार्थी तिष्ठत्यत्रैव।" काकः उक्तवान्, "उपायस्तावत् चिन्तनीयः।"

अथ प्रभाते क्षेत्रपतिर्लगुडहस्तः आगच्छन् काकेनावलोकितः । तमालोक्य काकेनोक्तम्, "सखे मृग, त्वमात्मानं मृतवत्संदर्शय । वातेनोदरं पूरयित्वा पादान्स्तब्धीकृत्य तिष्ठ । यदाहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसे ।" मृगस्तथैव स्थितः ।

क्षेत्रपतिना मृगः आलोकितः उक्तश्च, "आः! स्वयं मृतोऽसि!" सः मृगं बन्धनात् व्यमुञ्चत् । ततः काकशब्दं श्रुत्वा मृगः सत्वरं पलायितः । तमुद्दिश्य क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालस्तावद् हतः ।

१. **अवबोधनम् । (४ तः ३)** ३

क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

च) ............ मृगः आलोकितः । (जम्बूकेन / क्षेत्रपतिना)

छ) प्रदोषकाले मृगम् अन्विष्यन् .......... तत्र उपस्थित । (काकः / जम्बूकः)

ख) कः कं वदति? ''मन्मांसार्थी तिष्ठत्यत्रैव ।'' १

ग) पूर्णवाक्येन उत्तरं लिखत । शृगालः केन हतः ? १

घ) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत । १

मृगशब्दं श्रुत्वा काकः सत्वरं पलायितः ।

२. **शब्दज्ञानम् । (३ तः २)** २

क) २ पूर्वकालवाचक-धातुसाधित-त्वान्त-अव्यये लिखत । १

ख) गद्यांशात् विशेषण-विशेष्य-मेलनं कुरुत। १

| विशेषणम् | विशेष्यम् |
|---|---|
| १) शत्रुनन्दनः | उपायः |
| २) चिन्तनीयः | नरः |
| | शब्दम् |

ग) लकारं लिखत । सः मृगं बन्धनात् व्यमुञ्चत् । १

**२) आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।** ५

एकस्मिन् दिने शङ्करः स्नानार्थं पूर्णानदीं गतः। यदा सः स्नाने मग्नः तदा तत्र एकः नक्रः आगतः। नक्रः झटिति तस्य पादम् अगृह्णात्। तदा शङ्करः उच्चैः आक्रोशत्। ''अम्ब! त्रायस्व । नक्रात् त्रायस्व!'' आक्रोशं श्रुत्वा नदीतीरं प्राप्ता आर्याम्बा पुत्रं नक्रेण गृहीतमपश्यत् । भयाकुला सा अपि रोदनम् आरभत । शङ्करः मातरम् आर्ततया प्रार्थयत – ''अम्ब, इतःपरम् अहं न जीवामि। मरणात् पूर्वं संन्यासी भवितुम् इच्छामि । अधुना वा देहि अनुमतिम् ।'' चेतसा अनिच्छन्ती अपि विवशा माता अवदत् – ''वत्स, यथा तुभ्यं रोचते तथैव भवतु । इदानीमेव संन्यासं स्वीकुरु। मम अनुमतिः अस्ति'' इति। तत्क्षणमेव आश्चर्यं घटितम् । दैववशात् शङ्करः नक्राद् मुक्तः । स नदीतीरम् आगत्य मातुः चरणौ प्राणमत् ।

अनन्तरं शङ्करः मातरं संन्यासस्य महत्त्वम् अवाबोधयत् । संन्यासी न केवलम् एकस्याः पुत्रः । विशालं जगद् एव तस्य गृहम् । 'मातः, यदा त्वं स्मरिष्यसि तदा एव त्वत्समीपमागमिष्यामि' इति मात्रे प्रतिश्रुत्य सः गृहात् निरगच्छत् ।

१. **अवबोधनम्। (४ तः ३)** ३

क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

शङ्करः उच्चैः आक्रोशत् यतः................................।

१) सः व्याघ्रम् अपश्यत् ।

२) नक्रः झटिति तस्य पादम् अगृह्णात् ।

ख) कः कं वदति? ''अधुना वा देहि अनुमतिम् ।'' १

ग) पूर्णवाक्येन उत्तरं लिखत । १

शङ्करः मातरं किम् अवाबोधयत् ?

घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः? २

२) प्रवाहि-जालं पूरयत ।

[ ] → [ ] → [ ] → [ ]

(नक्रेण शङ्करस्य पादग्रहणम्, मात्रा अनुमतिप्रदानम्, शङ्करस्य पूर्णानदीं गमनम्, संन्यासार्थम् अनुमतियाचना)

इ) **गद्यांशं पठित्वा सरलार्थं लिखत । (२ तः १)** ४

| | |
|---|---|
| क) वैखानसः – | राजन् ! समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते। प्रविश्य प्रतिगृह्यताम् आतिथेयः सत्कारः । |
| दुष्यन्तः – | तपोवननिवासिनामुपरोधो मा भूत् । अत्रैव रथं स्थापय यावदवतरामि । |

| | |
|---|---|
| ख) नदी(विपाट्)– | कः खलु एषः मानवः ? अस्मान् किमर्थं वन्दते स्तौति च ? आर्य, किन्नामा भवान् ? कस्माद् अस्मान् आह्वयति ? |
| विश्वामित्रः – | अयि मातः, विश्वामित्रोऽहम् । दूरतः आयातः रथैः शकटैः च । वयं सर्वे परतीरं गन्तुं समुत्सुकाः । |

ई) **माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

क) महर्षिः कणादः परमाणुविषये किं प्रतिपादितवान् ?

ख) धरित्र्याः उपदेशं मनसि निधाय पृथुवैन्यः किं किम् अकरोत् ?

## तृतीयः विभागः – पद्यम् । (१२)

३) अ) **पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत । (५ तः ४)** ४

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा।।१।।
अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ।।२।।
वैद्यराज नमस्तुभ्यं यमराजसहोदर ।
यमस्तु हरति प्राणान् त्वं तु प्राणान् धनानि च ।।३।।

क) पूर्णवाक्येन उत्तरं लिखत । १

कविः कं नमति ?

ख) विशेषण-विशेष्ययोः मेलनं कुरुत। १

| अ | आ |
|---|---|
| १) अल्पानाम् | कार्यसाधिका |
| २) संहतिः | वस्तूनाम् |
| | गजानाम् |

ग) पद्यांशात् जालरेखाचित्रं पूरयत । १




घ) २ द्वितीयाविभक्त्यन्ते पदे लिखत । १

च) पूर्वपदम्/ उत्तरपदं लिखत। १

१) नमस्तुभ्यम् = ........... + तुभ्यम् ।

२) गुणत्वमापन्नैः = गुणत्वम् + .......... ।

आ) **पद्ये शुद्धे पूर्णे च लिखत। (३ तः २)** ४

१. आत्मनो............. साधनम् ।।

२. अयं न .............. निर्धनो वा ।।

३. उत्तमो .............. प्रजायते ।।

इ) **माध्यमभाषया सरलार्थं लिखत। (२ तः १)** २

१. सर्वधर्मान् परित्यज्य भज मानवतां ध्रुवम् ।
एषोऽभ्युदयकृत् पन्थाः तथा श्रेयस्करोऽपि च ।।

२. वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम् ।
वार्धक्ये दुःखहरणं हितं सद्ग्रन्थवाचनम् ।।

ई) **माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१. 'न्याय्यात् पथः प्रविचलन्ति पदं न धीरा ।' इति सूक्तिं स्पष्टीकुरुत ।

२. 'मानवताधर्म' इति काव्यस्य आधारेण मानवताधर्मस्य वर्णनं कुरुत ।

## चतुर्थः विभागः – लेखनकौशलम् । (३ तः २) (४)

४ अ) **विशिष्टविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (४ तः २)** २

१. गम्-गच्छ्  २. विना  ३. स्निह्  ४. कृते

आ) **संस्कृतानुवादं कुरुत । (४ तः २)** २

१. कोणत्या पक्ष्याचा रंग हिरवा आहे ?
किस पक्षी का रंग हरा हैं ?
Which bird has green colour ?

२. जंगलात पशुपक्षी राहतात.
जंगल में पशुपक्षी रहते हैं ।
Animals and birds live in the forest.

३. पोस्टमन पत्र वाचतो.
डाकिया पत्र पढ़ता हैं ।
Postman reads a letter.

४. नट रंगमंचावर अभिनय करतो.
अभिनेता रंगमंच पर अभिनय करता हैं ।
An actor acts on the stage.

इ) **अमरकोषात् समानार्थक शब्दं योजयित्वा वाक्यं पुनर्लिखत। (४ तः २)** २

१. राजा चिन्ताकुलः जातः ।

२. जम्बुकः तेन सह मृगस्य निवासस्थानं गतः ।

३. यत्र एकः अपि पादपः नास्ति तत्र एरण्डः द्रुमायते ।

४. मनुजाः वाचनेन बहून् विषयान् बोधन्ते ।

## पञ्चमः विभागः – भाषाभ्यासः । (८)

५) अ) **पृथक्करणं कुरुत ।** ४

१) नामानि सर्वनामानि च पृथक्कुरुत । (५ तः ४) २

| नाम | सर्वनाम |
|---|---|
| .............. | .............. |
| .............. | .............. |

(सर्वस्याम्, श्रीमन्तः, वाक्षु, अस्मै, शशिने)

२) क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत । (५ तः ४) २

| क्रियापदम् | धातुसाधितविशेषणम् |
|---|---|
| .............. | .............. |
| .............. | .............. |

(पठितव्यः, अयच्छत्, नीतवान्, पश्य, करोमि)

आ) निर्दिष्टाः कृतीः कुरुत । (४ तः २) ४

१) सङ्ख्या/क्रम/आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत। (३ तः २) २

क) भोजने ........... (६) रसेषु मधुरः रसः मम प्रियः । (षट्सु / षष्ठः)

ख) पौषमासः संवत्सरस्य ............. (१०) मासः। (दश / दशमः)

ग) वर्षस्य ...............(४) परीक्षा भवति । (चत्वारि / चतुर्वारं)

२) समासविग्रहाणां समासनामभिः मेलनं कुरुत । (६ तः ४) २

| समासविग्रहः | समासनाम |
|---|---|
| १) दिने दिने | १) इतरेतर-द्वन्दः । |
| २) कणादः नाम मुनिः | २) नञ् तत्पुरुषः । |
| ३) शुकाः च सारिकाः च | ३) बहुव्रीहिः । |
| ४) न रुचिः | ४) अव्ययीभावः । |
| ५) अल्पा धीः यस्य सः | ५) षष्ठी-तत्पुरुषः । |
| ६) पुस्तकस्य पठनम् | ६) कर्मधारयः । |

३) मञ्जूषातः समानार्थकशब्दान्/विरुद्धार्थकशब्दान् चित्वा लिखत। (४ तः २) २

(मञ्जूषा - अर्वाचीनाः, सुवर्णम्, कृषकः, विस्मरसि)

क) कनकम् = ख) स्मरसि ×

ग) कृषीवलः = घ) प्राचीनाः ×

४) योग्यं पर्यायं चिनुत । (३ तः २) २

क) बालकः अन्यशास्त्राणि अधीतवान् । (कर्तृवाच्यम् / कर्मवाच्यम्)

ख) त्वं श्वः मम महाविद्यालयम् ................ । (आगच्छ / आगच्छतु)

ग) खगाः ............... गगने उड्डयन्ते । (विशाले/ विशालात्)

***